# Sanakadibhih Kritam Vamana Stotram

# सनकादिभिः कृतं वामनस्तोत्रम्

## Document Information

Text title : Sanakadibhih Kritam Vamana Stotram

File name : sanakAdibhiHkRRitaMvAmanastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 146/62-69||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# सनकादिभिः कृतं वामनस्तोत्रम्

इत्युक्त्वा बटुरूपं तद्विहाय परमेश्वरः ।
ववृधे वामनोऽतीव कृत्वा रूपं चतुर्भुजम् ॥ ६२॥

वर्धमानं हरिं दृष्ट्वा ब्राह्मणा ऋषयः सुराः ।
तुष्टुवुर्गगने जातं भगवन्तं जनार्दनम् ॥ ६३॥

जय विष्णो जय विष्णो जय भक्तकृपाकर ।
जय ह्रस्व जय दीर्घ जय भिक्षुक वामन ॥ ६४॥

जय देवकृपाकर्तै जय भक्तस्य गोचर ।
जय यज्ञ जय हव्य जय वह्ने जयाऽच्युत ॥ ६५॥

जयाऽर्थिन् दाता नेता त्वं जय ब्रह्माण्डकृद्वपुः ।
जय मत्स्य नमस्तुभ्यं जय कूर्म धराधर ॥ ६६॥

जय वाराहरूपधृक् नृसिंहाय नमोऽस्तु ते ।
जय कृष्ण जय श्रीमन्नारायण नमोऽस्तु ते ॥ ६७॥

नमः कृष्णाय कम्भरागोपालाय नमो नमः ।
नमः पत्नीव्रताख्याय लक्ष्मीनाथाय ते नमः ॥ ६८॥

वर्णितं बहुधा शास्त्रे दृष्टं नैव कदापि यत् ।
दृश्यतेऽद्य कृपालेशाच्चतुर्दशधरास्थितैः ॥ ६९॥

वैराजं ते महद्रूपं दृष्ट्वा हृष्टाः स्म तारिताः ।

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने १४६-अध्यायान्तर्गतं सनकादिभिः कृतं वामनस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय १४६/६२-६९॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 146/62-69..

Proofread by PSA Easwaran

*Sanakadibhih Kritam Vamana Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*